# जननी गरीयसी

*सुनामधन्यः डक्टर प्रोफेसर-हरेकृष्ण शतपथिमहोदयः संप्रति तिरुपतिराष्ट्रियसंस्कृत-विद्यापीठस्य (मानितविश्वविद्यालयस्य) कुलपतिः अस्ति । माता निशादेवी-पिता कृष्णचन्द्रः च पुत्रस्य कविप्रतिभया गौरवेण च धन्यौ स्तः ।*

*अयं कविः भारतायनं महाकाव्यं विरच्य २०११ (2011) तमे ख्रीष्टाब्दे केन्द्रसाहित्याकादमीपुरस्कारभाक् अभवत् । जयदयाल डालमिया वाणीन्यासपुरस्कारेण रवीन्द्रनाथटागोरपुरस्कारेण आदिशङ्कराचार्योपाधिना च स विमण्डितः । जननी मे गरीयसी इति पद्यं तस्य महाकाव्यस्यांशविशेषः । विद्यार्थिनां परिवारे सुसंपर्कस्थापनाय मातृमहत्त्वज्ञानलाभाय अत्र कवितेयं सम्पाद्य प्रस्तुता ।*

विदीर्य वक्षः परिगृह्य कर्षणं
सदाभिषिक्ता जलपङ्कर्दमैः ।
अशेषशस्यं निजसन्ततिं प्रति
तनोति या सा जननी; न मेदिनी ।।१।।

सहस्ररश्मिप्रभया प्रतापिता
ह्युदासभावैरपि या प्रभाविता ।
करोति सन्तानकृते हि मङ्गलं
महीतले सा जननी; न मेदिनी ।।२।।

बहूनि पुष्पाणि फलानि तानि च
सुमिष्टमूलानि च पल्लवानि वा ।
यदा निजे वक्षसि सञ्चितानि नो
हिताय सा मे जननी; न मेदिनी ।।३।।

प्रचण्डवर्षाघनभीमगर्जनैः
प्रकम्पवातैस्तडितां च तर्जनैः ।
निरन्तरं जर्जरिताऽपि दुःखिनी
ददाति खाद्यं जननी; न मेदिनी ।।४।।

नवं नवं भावविलासवेष्टितं
मनोरमं मानवताङ्कुरोद्गमम् ।
प्रदर्शयन्ती स्मितहासशोभिनी
विभाति या सा जननी; न मोदिनी ।।५।।

नगाधिराजामृतकुम्भधारिणी
मरुज्जलव्योमधरामहस्विनी ।
महीतले मङ्गलकर्मकारिणी
महीयसी सा जननी; न मेदिनी ।।६।।

परार्थमेकां जनकात्मजां कदा
प्रसूय जाता धरणीह निश्चला ।
परं प्रसूते जनकांस्तु या हि सा
सदा पृथिव्याः जननी गरीयसी ।। ७ ।।

त्वदीयपादाम्बुजपुण्यपीठके
मया यदा श्रीयत एवमम्बिके ।
तदाऽस्मि किं नन्दननन्दकानने
यतः पृथिव्याः जननी गरीयसी ।।८।।

**(प्रफेसर हरेकृष्ण शतपथी, भारतायनम्)**

# अन्वया :

1. जलपङ्ककर्दमैः सदाभिषिक्ता या कर्षणं परिगृह्य वक्षः विदीर्य निजसन्ततिं प्रति अशेषं शस्यं तनोति सा जननी, न मेदिनी ।

2. सहस्त्ररश्मिप्रभया प्रतापिता उदासभावैरपि प्रभाविता या महीतले सन्तानकृते हि मङ्गलं करोति सा जननी, न मेदिनी ।

3. यया बहूनि पुष्पाणि तानि फलानि सुमिष्टमूलानि पल्लवानि वा निजे वक्षसि नो हिताय सञ्चितानि सा मे जननी, न मेदिनी ।

4. प्रचण्डवर्षाघनभीमगर्जनैः प्रकम्पवातैः तडितां च तर्जनैः निरन्तरं जर्जरिता अपि या दुःखिनी खाद्यं ददाति (सा) जननी, न मेदिनी ।

5. नवं नवं भावविलासवेष्टितं मनोरममानवताङ्कुरोद्गमं प्रदर्शयन्ती या स्मितहासिनी विभाति सा जननी, न मेदिनी ।

6. नगाधिराजामृतकुम्भधारिणी मरुत्जलव्योमधरामहस्विनी महीयसी (या) महीतले मङ्गलकर्मकारिणी (भवति) सा जननी, न मेदिनी ।

7. कदा धरणीह परार्थमेकां जनकात्मजां प्रसूय निश्चला जाता परं (या) सदा जनकान् हि प्रसूते सा जननी पृथिव्याः गरीयसी अस्ति ।

8. अम्बिके ! त्वदीयपादाम्बुजपुण्यपीठके मया यदा एवं श्रीयते । तदा किं नन्दननन्दकानने अस्मि (इति अनुभवः भवति) यतः जननी पृथिव्याः गरीयसी ।

## टिप्पणी :

विदीर्य - विदारणंकृत्वा - (ବିଦୀର୍ଣ୍ଣକରି) । तर्जनैः - ଧମକ / ନିନ୍ଦାଦ୍ୱାରା । तर्ज् + ल्युट् (करणे तृतीया) महस्विनी - तेजस्विनी (ଉଜ୍ଜ୍ୱଳ)। परार्थम् + एकाम्, जनकात्मजाम् - सीताम् (ସୀତାଙ୍କୁ) । जनकान् + तु, सन्तानान् (ସନ୍ତାନମାନଙ୍କୁ), एवम् + अम्बिके = एवमम्बिके, नगाधिराजामृतकुम्भधारिणी - (ହିମାଳୟରୁ ପ୍ରବାହିତ ଅମୃତତୁଲ୍ୟ ଗଙ୍ଗାଯମୁନା ସରସ୍ୱତୀ ଇତ୍ୟାଦି ନଦୀଧାରକୁ ଧାରଣ କରିଥିବା । श्रीयते-सेव्यते ।

# अभ्यासः

**1. निजभाषया प्रायशः वाक्यत्रयेण उत्तरं लिखत ।**

(क) जननी सन्ततिं प्रति किं तनोति ?

(ख) कानि संचित्य सा जननी भवितुम् अर्हति ?

(ग) सा जननी कैः जर्जरिता भवति ।

(घ) कया जननी मङ्गलकारिणी भवति ?

(ङ) जननी किं प्रदर्शयन्ती विभाति ?

(च) कुत्र कविः नन्दननन्दकाननसुखम् अनुभवति ?

**2. संक्षेपेण उत्तरं लिखत ।**

(क) जननी केन अभिषिक्ता ?

(ख) का अशेषं शस्यं तनोति ?

(ग) जननी कुत्र सन्तानकृते मङ्गलं करोति ?

(घ) का स्मितहासिनी ?

(ङ) नगाधिराजमृतकुम्भधारिणी इत्यस्य कः अर्थः ?

(च) किं कृत्वा धरणी निश्चला जाता ?

(छ) महस्विनी पदस्य कोऽर्थः ?

**3. वाक्यरचनां कुरुत ।**

जननी, करोति, हिताय, वक्षसि, विभाति, गरीयसी ।

**4. सन्धिं कुरुत ।**

सम् + चितानि, धरणी + इह, जनक + आत्मजाम्, सदा + अभिषिक्ता, एवम् + अम्बिके, तदा + अस्मि

**5. सन्धिविच्छेदं कुरुत ।**

हृयुदासभावैरपि, निरन्तरम्, मरुज्जलव्योम, जनकांस्तु ।

**6. बन्धनीमध्यात् विग्रहवाक्यं / समस्तपदं / समासनाम चित्वा शुद्धम् उत्तरं लिखत**

(क) उदासभावैः (उदासस्य भावाः तैः, उदासस्य भावः तैः, उदासः भावः तैः) ।

(ख) मह्याः तलं तस्मिन् (महीतलम्, महीतले, महीतलात्) ।

(ग) मनोरमम् (उपपदतत्पुरुषः, कर्मधारयः, द्विगुः) ।

(घ) जनकात्मजाम् (जनकस्य आत्मजा ताम्, जनकस्य आत्मजः तम्, जनकस्य आत्मजा तया) ।

(ङ) परार्थम् (बहुव्रीहिः, द्वन्द्वः, नित्यसमासः) ।

**7. बन्धनीमध्यात् शुद्धं प्रकृतिगतं प्रत्ययगतं वा उत्तरं चित्वा शुन्यस्थानं पूरयत ।**

(क) विदीर्य = वि + ______ + ल्यप् । (दृ, द्रा, द्रम्)

(ख) परिगृह्य = परि + ग्रह् + ______ । (ण्यत्, यत्, ल्यप्)

(ग) हिताय = ______ + क्त । (हु, हि, हा)

(घ) सञ्चितानि = सम् + चि + ______ । (क्तिन्, तिन्, क्त)

(ङ) प्रसूय = प्र + ______ + ल्यप् । (सृ, सूच्, सू)

(च) कर्षणम् = ______ + ल्युट् । (कुश्, कृष्, कष्)

(छ) तर्जनैः = तर्ज् + ______ । (ल्युट्, अन्, शानच्)

(ज) अभिषिक्ता = अभि + ______ + क्त + टाप् । (षिञ्, सिच्, शिज्)

■